DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

READINGS IN SANSKRIT
PART 3

# WEEK THREE

# DIAMOND MOUNTAIN UNIVERSITY

Readings in Sanskrit, 3
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

## Spring Term, Class Schedule

**WEEK THREE: Thursday, May 8, 2008, 1:00 – 4:00 PM**

A. Quiz
B. Review of homework (Bhagavad Gita verses; Nagarjuna, Chapters 25, 26)

**HOMEWORK:**

1. Provide a word by word English translation of verses below from the भगवद् गीता
2. Provide a word by word English translation of Chapter 27 of Arya Nagarjuna's मूलमध्यमककारिका (see below).

### भगवद् गीता

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ १८-६१ ॥

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ १८-६२ ॥

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ १८-६३

सर्वगुह्यतमं भूयः शृणु मे परमं वचः।

इष्टोऽसि दृढमिति ततो वक्ष्यामि ते हितं॥ १९-६४

मन्मना भव मद्भाक्तो मद्याजी मं नमस्कुरु।

मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे॥ १८-६५

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥ १८-६६

इदं ते नातपस्काय नाभक्ताय कदाचन।

न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति॥ १८-६७

य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।

भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥ १८-६८

न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।

भविता न च मे तस्मादन्यः प्रियतरो भुवि॥ १८-६९

अध्येष्यते च य इमं धर्म्यं संवादमावयोः ।

ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ १८-७० ॥

श्रद्धावाननसूयश्च शृणुयादपि यो नरः ।

सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ १८-७१ ॥

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।

कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ १८-७२ ॥

अर्जुन उवाच ।

arjuna uvāca ।

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ।

स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ १८-७३ ॥

## मूलमध्यमककारिका

## दृष्टिपरीक्षा नाम सप्तविंशतितं प्रकरणं

दृष्टयो ऽभूवं नाभूवं किं न्व् अतीते ऽध्वनीति च।

यास्ताः शाश्वतलोकाद्याः पूर्वान्तं समुपाश्रिताः॥ १

दृष्टयो न भविष्यामि किमन्यो ऽनागते ऽध्वनि।

भविष्यामीति चान्ताद्या अपरान्तं समाश्रिताः॥ २

अभूमतीतमध्वानमित्येतन्नोपपद्यते।
यो हि जन्मसु पूर्वेषु स एव न भवत्ययं॥ ३

स एवात्मेति तु भवेदुपादाणं विशिष्यते।
उपादानविनिर्मुक्त आत्मा ते कतमः पुनः॥ ४

उपादानविनिर्मुक्तो नास्त्यात्मेति कृते सति।
स्यादुपादानमेवात्मा नास्ति चात्मेति वः पुनः॥ ५

नचोपादानमेवात्मा व्येति तत्समुदेति च।
कथं हि नामोपादानमुपादाता भविष्यति॥ ६

अन्यः पुनरुपादानादात्मा नैवोपपद्यते।
गृह्येत ह्यनुपादानो यद्यन्यो न च गृह्यते॥ ७

एवं नान्य उपादानान्न चोपादानमेव सः।
आत्मा नास्त्यनुपादानो  नापि नात्येष निश्चयः॥ ८

नाभूमतीतमध्वानमित्येतन्नोपपद्यते।
यो हि जन्मसु पूर्वेषु ततो ऽन्यो न भवत्ययम्॥ ९

यदि ह्ययं भवेदन्यः प्रत्याख्यायापि तं भवेत्।
तथैव च स संतिष्ठेत्तत्र जायेत वामृतः॥ १०

उच्चेदः कर्मणां नाशस् तथान्येन कृतकर्मणां।
अन्येन परिभोगः स्याद् एवमादि प्रसज्यते॥ ११

नाप्यभूत्वा समुद्भूतो दोषो ह्यत्र प्रसज्यते।
कृतको वा भवेदात्मा संभूतो वाप्यहेतुकः॥ १२

एवं दृष्टिरतीते या नाभूमहमभूमहं।
उभयं नोभयं चेति नैषा समुपपद्यते॥ १३

अध्वन्यनागते किं नु भविष्यामीति दर्शनं।
न भविष्यामि चेत्येतदतीतेनाध्वना समं॥ १४

स देवः स मनुष्यश्चेदेवं भवति शाश्वतं।
अनुत्पन्नश्च देवः स्याज्जायते न हि शाश्वतं॥ १५

देवादन्यो मनुष्यश्चेदशाश्वततमतो भवेत्।
देवादन्यो मनुष्यश्चेत्संततिर्नोपपद्यते॥ १६

दिव्यो यद्येकदेशः स्यादेक्देशश्च मानुषः।
अशाश्वतं शाश्वतं च भवेत्तच्च न युज्यते॥ १७

अशाश्वतं शाश्वतं च प्रसिद्धमुभयं यदि।
सिद्धे न शाश्वतं कामं नैवाशाश्वतमित्यपि॥ १८

कुतश्चिदागतः कश्चित्किं चिद्गच्छेत्पुनः क्व चित्।
यदि तस्मादनादिस्तु संसारः स्यान्न चास्ति सः॥ १९

नास्ति चेच्छाश्वतः कश्चित्को भविष्यत्यशाश्वतः।
शाश्वतो ऽशाश्वतश्चापि द्वाभ्यामाभ्यां तिरस्कृतः॥ २०

अन्तवान् यदि लोकः स्यात्परलोकः कथं भवेत्।
अथाप्यनन्तवांल्ँ लोकः परलोकः कथं भवेत्॥ २१

स्कन्धानामेष संतानो यस्माद्दीपार्चिषामिव।
प्रवर्तते तस्मान्नान्तानन्तवत्त्वं च युज्यते॥ २२

पूर्वे यदि च भज्येरन्नुत्पद्येरन्न चाप्यमी।
स्कन्धाः स्कन्धान् प्रतीत्येमानथ लोको ऽन्तवान् भवेत्। २३

पूर्वे यदि न भज्येरन्नुत्पद्येरन्न चाप्यमी।

स्कन्धाः स्कन्धान् प्रतीत्येमाण् लोको ऽनन्तो भवेदथ॥ २४

अन्तवानेकदेशश्चेदेकदेशस्त्वनन्तवान्।

स्यादन्तवाननन्तश्च लोकस्तच्च न युज्यते॥ २५

कथं तावदुपादातुरेकदेशो विनङ्क्ष्यते।

न नङ्क्ष्यते चैकदेश एवं चैतन्न युज्यते॥ २६

उपादानैकदेशश्च कथं नाम विनङ्क्ष्यते।

न नङ्क्ष्यते चैकदेशो नैतदप्युपपद्यते॥ २७

अन्तवच्चाप्यनन्तं च प्रसिद्धमुभयं यदि।

सिद्धे नैवान्तवत्कामं नैवानन्तवदित्यपि॥ २८

अथ वा सर्वभावानां शून्यत्वाच्छाश्वतादयः।

क्व कस्य कतमाः कस्मात्संभविष्यन्ति दृष्टयः । २९

सर्वदृष्टिप्रहाणाय यः सद्धर्ममदेशयत्।

अनुकम्पामुपादाय तं नमस्यामि गौतमं॥ ३०